# shiva AratI

# શ્રીશિવ આરતી

## Document Information

Text title : Shiva Arati

File name : shivAratI.itx

Category : AratI, shiva

Location : doc_shiva

Transliterated by : Shailendra Sharma

Proofread by : Shailendra Sharma, Avinash Sathaye sohum at ms.uky.edu, Sunder Hattangadi

Latest update : December 23, 2007

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

shiva AratI

# શ્રીશિવ આરતી

સર્વેશં પરમેશં શ્રીપાર્વતીશં વન્દેઽહં વિશ્વેશં શ્રીપન્નગેશમ્ ।
શ્રીસામ્બં શમ્ભું શિવં ત્રૈલોક્યપૂજ્યં વન્દેઽહં ત્રૈનેત્રં શ્રીકંઠમીશમ્ ॥ ૧॥

ભસ્મામ્બરધરમીશં સુરપારિજાતં બિલ્વાર્ચિતપદયુગલં સોમં સોમેશમ્ ।
જગદાલયપરિશોભિતદેવં પરમાત્મં વન્દેઽહં શિવશઙ્કરમીશં દેવેશમ્ ॥ ૨॥

કૈલાસપ્રિયવાસં કરુણાકરમીશં કાત્યાયનીવિલસિતપ્રિયવામભાગમ્ ।
પ્રણવાર્ચિતમાત્માર્ચિતં સંસેવિતરૂપં વન્દેઽહં શિવશઙ્કરમીશં દેવેશમ્ ॥ ૩॥

મન્મથનિજમદદહનં દાક્ષાયનીશં નિર્ગુણગુણસંભરિતં કૈવલ્યપુરુષમ્ ।
ભક્તાનુગ્રહવિગ્રહમાનન્દજૈકં વન્દેઽહં શિવશઙ્કરમીશં દેવેશમ્ ॥ ૪॥

સુરગંગાસમ્પ્લાવિતપાવનનિજશિખરં સમભૂષિતશશિબિમ્બં જટાધરં દેવમ્ ।
નિરતોજ્જ્વલદાવાનલનયનફાલભાગં વન્દેઽહં શિવશઙ્કરમીશં દેવેશમ્ ॥ ૫॥

શશિસૂર્યનેત્રદ્વયમારાધ્યપુરુષં સુરકિન્નરપન્નગમયમીશં સંકાશમ્ ।
શરવણભવસમ્પૂજિતનિજપાદપદ્મં વન્દેઽહં શિવશઙ્કરમીશં દેવેશમ્ ॥ ૬॥

શ્રીશૈલપુરવાસં ઈશં મલ્લીશં શ્રીકાલહસ્તીશં સ્વર્ણમુખીવાસમ્ ।
કાઞ્ચીપુરમીશં શ્રીકામાક્ષીતેજં વન્દેઽહં શિવશઙ્કરમીશં દેવેશમ્ ॥ ૭॥

ત્રિપુરાન્તકમીશં અરુણાચલેશં દક્ષિણામૂર્તિં ગુરું લોકપૂજ્યમ્ ।
ચિદમ્બરપુરવાસં પઞ્ચલિંગમૂર્તિં વન્દેઽહં શિવશઙ્કરમીશં દેવેશમ્ ॥ ૮॥

જ્યોતિર્મયશુભલિંગં સઙ્ખ્યાત્રયનાટ્યં ત્રયીવેદ્યમાદ્યં પઞ્ચાનનમીશમ્ ।
વેદાદ્ભુતગાત્રં વેદાર્ણવજનિતં વેદાગ્રં વિશ્વાગ્રં શ્રીવિશ્વનાથમ્ ॥ ૯॥

Encoded by Shailendra Sharma
Proofreading support by
Avinash Sathaye and Sunder Hattangadi

*shiva AratI*

pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*